# Ramartharatnamanjusha or Ramanamarthavimshatih

# રામાર્થરત્નમઞ્જૂષા અથવા રામનામાર્થવિંશતિઃ

## Document Information

Text title : Ramartharatnamanjusha or Ramanamarthavimshatih

File name : rAmArtharatnamanjUShA.itx

Category : raama, rAmAnanda, viMshati

Location : doc_raama

Author : Haryanandacharya

Proofread by : Parashara Ranganathan

Latest update : January 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2024

*sanskritdocuments.org*

# રામાર્થરત્નમઞ્જૂષા અથવા રામનામાર્થવિંશતિઃ

શ્રિયાનન્દં ગુરું નત્વા પરબ્રહ્મ ચ રાઘવમ્ ।
રામાર્થરત્નમઞ્જૂષાં કુર્વે રામાર્થબુદ્ધયે ॥ ૧॥

હૃદયં મન્ત્રરૂપેણ રામવાચકરેણ યઃ ।
શ્રિતસ્યામતિ ચાપ્નોતિ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૨॥

રેણ પરશુરામેણ સેવાર્થમમ્યતે હિ યઃ ।
પરશુરામગમ્યશ્ચ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૩॥

યસ્ય રોઽર્થાદ્ધિ દાનસ્ય ત્વિયત્તાઽમોઽસ્તિ ન ક્વચિત ।
દાનસ્યેયત્તયા શૂન્યઃ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૪॥

સ્વસ્યાશ્રિત હિ યો નિત્યં રમયત્યપકારિણમ્ ।
અભિરામો જનસ્યાત્ર સ રામઃ પરિકીર્ત્તિતઃ ॥ ૫॥

સકૃત્ પ્રપત્તિતો યશ્ચ સર્વેભ્યોઽભયદો હિ તત્ ।
રમન્તે યોગિનો યસ્મિન્ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૬॥

યસ્ય રા દાનમેવાસ્તિ મા લક્ષ્મીશ્ચાત્ર વિશ્રુતા ।
સતતં દાનકર્ત્તા હિ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૭॥

પાલનાયામતિ સ્વીયાન્ રવાચ્યાયાં ક્ષિતૌ ચ યઃ ।
કાલે ચાવતરત્યેવ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૮॥

બ્રહ્મવિષ્ણુશિવાદીનાં રવાચ્યૈશ્વર્યશાલિનામ્ ।
ગમશ્ચામોઽવિતું યસ્ય સ રામઃ પરિકીર્ત્તિતઃ ॥ ૯॥

રં ખ્યાદેશ્ચ તેજો યો ભાસયત્યમતિ સ્વયમ્ ।
સર્વલોકહિતાર્થં વૈ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૦॥

સેવાર્થમમ્યતે કાલે રૈઃ શિવબ્રહ્મવિષ્ણુભિઃ ।
સેવ્યો યઃ શમ્ભુવિધ્યાદેઃ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૧॥

રેણૈશ્વર્યેણ યુક્તૈર્યો મનસા પ્રાપ્યતેઽમ્યતે ।
બ્રહ્મવિષ્ણુશિવાદ્યૈશ્ચ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૨॥

યશ્ચામત્યભિરામેણ લોકેષુ સકલેષુ વૈ ।
લાવણ્યયુક્તદેહેન સ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૩॥

અત્રામયતિ યઃ સ્વીયાન્ રવાચ્યૈશ્વર્યશાલિતામ્ ।
સર્વદા ચાભિમુખ્યેન સઃ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૪॥

અમ્યતે ક્ષમયા લોકૈ રવાચ્યક્ષ્માક્ષમેશવત્ ।
સર્વદા ક્રોધશૂન્યો યઃ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૫॥

મીયતે છિદ્યતે યો ન દેશૈઃ કાલૈશ્ચ વસ્તુભિઃ ।
અમો નિત્યં રવાચ્યો હિ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૬॥

અમો યસ્ય ત્વિયત્તા નો રસ્ય રાયશ્ચ સર્વથા ।
અમિતૈશ્વર્યવાન્ યો હિ સ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૭॥

રાંશ્ચાખિલગર્વાંશ્ચ વિનાશમમયેદ્ધિ યઃ ।
દેવાદિભયદત્વેન સ રામઃ પરિકીર્ત્તિતઃ ॥ ૧૮॥

સર્વેન્દ્રિયૈર્હિ રૈર્યશ્ચાપ્રાપ્યતે નામ્યતે કિલ ।
ઇન્દ્રિયાગોચરસ્તસ્માત્ સ રામઃ પરિકીર્તિતઃ ॥ ૧૯॥

અમઃ પ્રાપ્તિશ્ચ યસ્યાસ્તુ રવાચ્યાયાઃ ક્ષિતેર્હિ સા ।
રામાસ્તિ સર્વદા યસ્ય સ રામઃ પરિકીર્ત્તિતઃ ॥ ૨૦॥

મહારાજાધિરાજૈ રૈરમ્યતે સેવ્યતે ચ યઃ ।
સ્વામી ચ સર્વલોકાનાં સ રામઃ પરિકીર્ત્તિતઃ ॥ ૨૧॥

શ્રિયાનન્દાર્યશિષ્યેણ હર્યાનન્દેન નિર્મિતા ।
કલ્યાણકારિણી ભૂયાદ રામનામાર્થવિંશતિઃ ॥ ૨૨॥

ઇતિ પ્રતિપક્ષિભયઙ્કર જગદ્ગુરુ શ્રીહર્યાન્દાચાર્ય
સિદ્ધશિરોમણિ વિરચિતા શ્રીરામાર્થરત્નમઞ્જૂષા
અથવા શ્રીરામનામાર્થવિંશતિઃ સમ્પૂર્ણા ।

Proofread by Parashara Ranganathan

*Ramartharatnamanjusha or Ramanamarthavimshatih*

pdf was typeset on January 28, 2024

Please send corrections to *sanskrit@cheerful.com*